உ

அருணாசலம்

In Public domain. Digitization Muthulakshmi Research Academy

द्विशतिकालोत्तरम्

Dviśatikālottaram

Saivasastra Prachara Sabha - March 2021

In Public domain. Digitization Muthulakshmi Research Academy

|| ॐ ||

In Public domain. Digitization Muthulakshmi Research Academy

द्विशतिकालोत्तरागमः

अघोरशिवाचार्यकृतवृत्तिसहितः

DVIŚATIKĀLOTTARĀGAMAḤ

With the commentary

VṚTTI

by

Sri Aghorasivacharya

Critically edited for the first time

on the basis of manuscripts

by

Dr. T. GANESAN

Research Associate

French Institute of Pondicherry

&

Dr. S.A. S. SARMA

Research Scholar,

French School for Far-Eastern Studies (EFEO)

Pondicherry

In Public domain. Digitization Muthulakshmi Research Academy

In Public domain. Digitization Muthulakshmi Research Academy

अघोरशिवाचार्यकृतवृत्तिसहितः

ओं नमः शिवाय ह्रीं शिवायै नमः॥

श्रीमदरुणाचलाय नमः।

कार्त्तिकेय उवाच-

शिवं शिवकरं नत्वा शैवानां हितकारिणी।

श्रीमत्कालोत्तरे वृत्तिर्द्विशते क्रियते मया॥

वृत्तिविस्तरसंक्षेपाः स्फुटत्वादिविषादिनः।

विदुषां प्रीतये सोऽयं स्मदा(स्मृता) लघ्वी विधीयते॥

In Public domain. Digitization Muthulakshmi Research Academy

अत्र

मह

प्रति

[म

अ

श्री

कि

अ

अ

अ

व

अ

म

अत्र हि शैवशास्त्राणां गुरूपलब्धसम्बन्धो द्विविधः। साधारणोऽसाधारणश्च।
In Public domain. Digitization Muthulakshmi Research Academy

महौघक्रमलक्षणः सर्वसंहितागतः सर्वसाधारणोऽनन्तादिरूपः

प्रतिसंहितागुरुक्रमस्त्वसाधारणं प्रणवादिरूपः । उभसम्बन्धिज्ञानमचार्य

[माचार्य?]लब्धाधिकारः कार्त्तिकेयस्तस्मिन् महति तन्त्रे मनुष्याणां

आयुष्यादिभिर्वक्ष्यमाणैर्हेतुभिः सामर्थ्यं बुद्ध्वा तदनुग्रहाय स्वगुरुं भगवन्तं

श्रीकण्ठनाथमुवाचेति कार्त्तिकेयशिष्यः तत्प्रशिष्यो वै [वा?] स्वशिष्येभ्यः कथयति।

किमुवाचेत्याह-

अल्पायुषस्त्विमे मर्त्या अल्पवीर्यपराक्रमाः।

अल्पसत्वाल्पवित्ताश्च लोभमोहसमन्विताः॥ १॥

अल्पग्रन्थं महार्थं च पदार्थैनेकसंकुलम्।

वक्तुमर्हसि देवेशानुग्रहार्थं मम प्रभो॥ २॥

अत्र हि विस्तृते शास्त्रे तदर्थानुष्ठाने च रुद्राणां देवानामेव द्वाराधिकारात् सामान्येन

मनुष्याणां नाधिकार इति दर्शयितुम् इदानीं तान् विशेषयति।

In Public domain. Digitization Muthulakshmi Research Academy

लोके हि लोभे संस्कारतृष्णया मोहेनानित्याशुचिदुःखानात्मसु नित्यशुद्धसुखात्मप्रतिपत्तिरूपेण चित्तमलेनान्विताः मनुष्यास्तेषां मध्याद् ये मलपरिपाकवशात् कथंचिदधिकारिणः सम्पन्नाः । यदुक्तं श्रीमन्मृगेन्द्रे-

संसारात् स विरज्येत प्रध्वस्तकलुषः सदा। इति।

अल्पकालजीवितत्वादतिविस्तृते तन्त्रे व्योमव्याप्यादिमन्त्रशतेषु चाध्ययनश्रवणादिकमपि तावत् कर्तुं न समर्थः कथंचिदतिविस्तीर्णे तदर्थानुष्ठानेन न शक्त एव। यदाहुः-

अर्थी शक्तो विद्वान् शास्त्रेण पर्युदस्तं कृतम्। इति।

तत्र वीर्यं करणपाटवं पराक्रमः कायपाटवम्। यद्वा वीर्यं बलं पराक्रमः उत्साहः। किंच अल्पसत्वा अल्पवित्ताश्च एतेऽल्पसत्वेन तावत्त्रय[तापत्रय ?]सहिष्णुतया सर्वतोन्मीलितरागादिदोषत्वाच्च तत्तमसिधाराव्रतयोद्यनुष्ठातुं न शक्नोति। अल्पवित्तत्वात् अनेककर्पूरचन्दनादिद्रव्यसाध्यं विस्तीर्णं पूजाहोमादिकमनुष्ठातुं न प्रभवन्ति।

ततश्च भो देवेश देवानां पिशाचादिपितामहान्तानां देवयोनिनाम् ईशन देव प्रभो प्रभवनलीलानुग्रहार्थं भोगमोक्षसाधनानुष्ठानज्ञानार्थं च अल्पो ग्रन्थो यस्मिन्

मन्त्रतन्त्रतदात्मके शास्त्रे तद्वक्तुमर्हसीति प्रार्थना। परित्यक्तार्थवादानुवादैः संक्षिप्तैः
In Public domain. Digitization Muthulakshmi Research Academy

पटलादिभिरल्पाक्षरासंख्यैः मन्त्रैश्च युक्तमित्यर्थः।

न त्वेवमल्पप्रयोजनमित्याह-

महार्थं च महानर्थः सिद्धिमुक्तिलक्षणो यस्मादुक्तेनैव प्रयोजनेनोपेतमिति यावदभिधेयेनापि नैव (?) .... युक्तमुच्यते पदार्थैः प्रतिपशुपाशसाधनैः भोगमोक्षसाधनैर्वा विधिक्रियाकालयोग्यशिवाभिधानैः अनेक . . . . भेदभिन्नैः संकुलमनेकपदार्थाभिधेयमित्यर्थः। तत्र पतिपदार्थे शिवतच्छक्तिमुक्तात्मनां विद्येश्वरादिभिः सह संग्रहः। पशुपदार्थे तु विज्ञानाकलप्रलयाकलसकलरूपाणां सर्वेषां बन्धात्मनां [बद्धात्मनां ?] पाशपदार्थे च मलकर्ममायातत्कार्यरोधनशक्तीनां विधिः दीक्षाक्रियादिस्नानादिकालस्त्युत्यात्मिकसंक्रान्ता तद्योगश्च नाडीचक्रादिविषयः । शिवस्तु प्रासादलक्षणो वक्ष्यमाण एवं च यतोऽहमेषामधिकारिणां मर्त्यानामनुग्रहं कर्तुमिच्छामि ततो विशिष्टस्वरूपप्रयोजनाभिधेयं शास्त्रं मम वक्तुमर्हसीति ।

इत्थं प्रार्थनास्वरूपमवगम्य भगवानाह-

In Public domain. Digitization Muthulakshmi Research Academy

ईश्वर उवाच-

अथातः सम्प्रवक्ष्यामि शास्त्रसद्भावमुत्तमम्।

नाम्ना . . . . त्तन्त्राद्दध्नो[1] घृतमिवोद्धृतम्॥ ३॥

मधुवच्च यथा पुष्पात् सारात् सारमिदं शुभम्।

अथेति। प्रश्नानन्तरमस्योपक्रमादेव सिद्धेः। अपि तु परमेश्वर ज्ञानानन्तरं यत् प्रवृत्तं तद्वक्ष्यत इति। तज्ज्ञानं चानुग्राह्याद्यनुग्रहणाय शास्त्रप्रणयनेच्छातस्तत्कर्तृकं रचनायां कर्तारमन्तरेणासम्भवादकर्तृत्वं शास्त्रं न सम्भवति। नाप्यन्यकर्तृकम्। तेषां सर्वज्ञत्वेन [असर्वज्ञत्वेन ?] शिवादिवस्त्वपरिज्ञानात्। अतश्च पतिपदार्थस्यात्र प्रथममुद्देशः सिद्धः। अत इति हेतौ। यतो मर्त्याः परिणतमलत्वेन शक्त्याघ्राता अपि विस्तृतशास्त्रानधिकारिणस्तवचना [तव वचना ?]नुग्राह्यत्वेनाभिमतात् ततो हेतोः शास्त्रस्य मन्त्रतन्त्रात्मनः सद्भावं परमार्थमर्थवादनिर्मुक्तं सारार्थवाचकमुपयोगिस्वरूपं सम्यग्यथाव्यवस्थितम् । संक्षेपप्रकर्षतो वक्ष्यामि। अतश्चोत्तमं न ह्यल्पग्रन्थं महार्थं च शास्त्रं

[1] नाम्ना . . . . त्तन्त्राद्-अ; नाम्ना तु वातुलात्तन्त्राद्-आ

क्वचिदप्यस्ति । यदि चोत्तमं प्रकृष्टबलसाधनविषयं यद्यं श्रीकण्ठकर्तृकः कथं परमेश्वरकर्तृकं
In Public domain. Digitization Muthulakshmi Research Academy
शास्त्रमित्युक्तम् । यतो वातुलाख्यात्तन्त्रादुद्धृतं बाधृ (वाधृ?) विलोडने इत्यस्माद्धातोः बाहुलकादौणादिको लप्रत्ययः यत्सिद्धरूपः तेन नाम्ना वातुलः लोडनं समस्ताज्ञानप्रतिघातकविचित्रप्रकाश्यार्थाधारं(?) च तन्त्रमितिप्रसिद्धं परमेशं यच्छास्त्रमाग्नेयं कालोत्तरं यत्तस्मात् प्रकृतिभूतार्थकेवलमर्थवादादिपरित्यागेन तदाज्ञयैव या स्वबुद्ध्या निर्मध्ये ताभिरेव शब्दार्थै मात्राभिरुद्धृतं गृहीतं किमिव ? दध्नो घृतमिव पुष्पाच्च मध्विव च या तस्माद्दध्नोऽपि सारं घृतं वृक्षस्य च सारात् पुष्पात् सारो मधु। एवं शास्त्रसारात् वातुलात् साराच्चतुःशतिकादेव सारभूता शुभम् च निरपदादं विलादसंवात् ? वातुलसारस्य पदादिरपि सम्बन्धः सिद्धः। दृष्टान्तद्वयं दार्ष्टान्तिकस्य सारतां दृढीकर्तुम् उपक्रमं एतदेवात्रादिसूत्रमाधेयप्रयोजनयोः स्थूलनयेन सकलशास्त्रार्थपरिपूर्णत्वात् ।

नन्वेवमेकश्लोक आदिसूत्रं भवितुमर्हति ?। तन्न। यदितो [आदितो ?] यावतिपदसमूहे एकक्रियानुविधः तस्यैवैकवाक्यत्वम्। यदाहुः-

अर्थैकत्वादेकवाक्यं साकाङ्क्षं नो [चेद् ?]विभागः स्यात् । इति।

अथ मन्त्रसंक्षेपमेव दर्शयितुमल्परुन्धस्यैव शास्त्रस्योपक्रमः-

In Public domain. Digitization Muthulakshmi Research Academy

नादाख्यं[2] यत् परं बीजं सर्वभूतेष्ववस्थितम्॥ ४॥

नाद इत्याख्या यस्य तन्नादाख्यम्। अत्र कश्चिदाह-

यदत्र स्थूलध्वनिरूपान्तरं स्थानभेदतः अनेकवर्णतामापादयति।

यदाहुः-

आकाशवायुप्रभवः शरीरात् समुच्चरन् वक्रमुपैति नादः।

स्थानान्तरेषु प्रविभज्यमानो वर्णत्वमागच्छति यः स शब्दः॥ इति।

किं तदेवात्र विवक्षितः ? नेत्याह – यत् परं बीजमिति।

यदेतद्वक्ष्यमाण . . . . यन शास्त्रान्तरोक्तवच्च बिन्द्वादिक्रमेण स्थूलमन्त्राद्युत्पादकम् अत एव परं सर्वभूतानाम् अभिधेयबुद्धिबीजं महामायाशक्तेः प्रथमपरिणतिरूपं च नादाख्यम्।

यदुक्तम् श्रीमन्मृगेन्द्रे –

---

[2] नादाख्यं-अ; सादाख्यं-आ [नादाख्यं इति व्याख्यानोद्धृतपाठः]

शक्तेर्नादो भवेद्बिन्दुरक्षरम् मातृका ततः ।

In Public domain. Digitization Muthulakshmi Research Academy

तच्च रक्ष्यमाणत्वात् सर्वभूतेष्ववस्थितम्॥

किंच वर्णात्मकत्वेनान्त्यवर्णोच्चारणकाले पूर्वेषां भावभिधायकत्वानुपपत्तेः ? अन्येन कारणेन प्रतिपुरुषगतेन केनापि भवितव्यम् । तच्च न बुध्यादिभ्योन्य(त?)मन्त्रत्व तेषां स्वकार्यैएव सिद्धेः। कार्यान्तरहेतुके प्रमाणाभावात् अनेकत्वपरिकल्पनाभावप्रसङ्गाच्च एषा च नादसिद्धिः तत्कारणभूतमहामायासिद्धिश्च तत भवितारसकण्डेन नादकारिकायां विस्तरेण प्रदर्शिता। प्रदर्शिता चास्माभिर्मृगेन्द्रवृत्तिदीपिकायाम् इति तत एवावधार्यः । अस्य च नादस्य ज्ञानमाचार्येणावश्यं कर्तव्यमित्याह -

तम् विदित्वा महासेन देशिकः पाशहा भवेत्।

द्वि(दि)शति प्रयच्छति परतत्त्वावबोधेनाधिकारिभ्यः इति देशिक आचार्यः। पाशाश्च मलकर्ममायारोधशक्त्याख्याः। तत्र मलः पशुनाद्यावारको रेरवात्मावारकानन्तश . . . . क्तो व्यापकश्च द्व कर्म च प्रवाहानाद्यात्मककर्तृकः विचित्रफलकद्वयकं च धर्माधर्मात्मकम्। स्वकार्यरुतेन (रूपेण?) कलादिक्षित्यन्तत्रिंशत्तत्त्वात्मकः स्थूले . . . . न साधारणैः

भुवनादिभिः साधारणासाधारणैश्च भुवनस्य शरीरैः आत्मानं (आत्मनाम्?)
In Public domain. Digitization Muthulakshmi Research Academy

भोग्यभोगजनिका रोधशक्तिः पाशधर्मानुवर्तिका। शिवशक्तिरेवोपचारेण पाश . . . . र्थं

परार्थात्रानेकप्रकारो निर्दिष्टः। तेषां च हननं पुरुषप्रतिबन्धत्वनिवृत्तिरेव।

पाशछेदादिकमाचार्यो विषनिवृत्त्यादिमन्त्रवत् मन्त्रद्वारेण क . . . . श्चात्रातिदूरवर्तिनः

शुद्धविद्याश्रितत्वाख्यम् । तस्मिंश्च नादस्वरूपो (स्वरूपे ?) विदिते तत्परिणतिरूपा

वाचकमन्त्रास्तद्वाव्यश्च (तद्वाच्यश्च ?) मननत्राणधर्मिणः त एव मन्त्राः ज्ञाता विनियोज्या

भवन्ति। त . . . . रवासौ पाशहा भवेत्। अथ किं शुद्धाध्ववर्तिभिः असौ नादः प्रतीयते ।

अत आह-

आशापालाङ्गना पाला म्लेच्छा . . . . त[3]॥५॥

अन्तर्जलगताः सत्वास्तेऽपि तत्वम् प्रवर्तितम्[4]।

---

[3] आशापालाङ्गना पाला म्लेच्छा . . . . त-अ; आगोपालाङ्गना बाला म्लेच्छाः प्राकृतभाषिणः-आ

[4] तत्वम् प्रवर्तितम्-अ;

गोपालादयः प्रसिद्धाश्च गां सदाशिवो किं शास्त्ररूपां पावयन्तीति गोपालाः . . . . दयः।
In Public domain. Digitization Muthulakshmi Research Academy

अङ्गनाः सप्तकोटिसंख्या विद्याः बालाः मण्डलादयो परमन्त्रेशाः म्लेच्छाः साज्ञाना गहने . .

. . दयो भुवनेशाः । प्राकृतभाषिणः गुणतत्त्वस्थानयोगिनो बुद्धितत्त्वस्था देवयोनयश्च

अन्तर्गताः । ब्रह्माण्डान्तःस्था ब्रह्मादयः ज . . . . का जलोपलजित (जलोपलक्षित?)

जलाद्यावरणस्थाः पञ्चका रुद्राः तद्भुवननिवासिनः।

एवं शुद्धाशुद्धभुवननिवासिनः सर्व एवात्मानः तन्नादमभिधेयबुद्धि . . . . न परमात्मकं

प्रत्यात्मनियतं अवर्ति अतः स्वयम् उच्चरन्ति धारयन्तीत्यर्थः । स्त्र . . . . के

सूचनारूपत्वादर्थद्वयमभि(वि ?)रुद्धम्। इदं च तात्पर्यं सकलपुरुषगतात्

बोध्यपरामर्शलक्षणात् कार्यादौ सर्वभूतावस्थितः सिद्धः। अतः सन्निकृष्टत्वेनासौ ज्ञातुं शक्य

एव। न चाशुद्धमस्य शुद्ध इति वा शुद्धस्याप्यशुद्धेऽध्वनि अप्रगमश्चेत्याशङ्कनीयम् । ईश्वरेण

व्यभिचारात् तस्य यथा

पुरुषं भोगमोक्ष . . . . कार्यानुपपत्त्या प्रगमोऽत्र सिद्धः। तथा व्याप्त्यविरोधः।

यदाहुः –

प्राग्रूपता चेदुत्कामदेवबोधस्य शाश्वती।

In Public domain. Digitization Muthulakshmi Research Academy

न प्रकाशः प्रकाशेत स हि प्रत्यवमर्शिनी । इति।

अत एव पशुपदार्थोऽप्यनेकभेदं भिन्नः प्रदर्शितः । यद्येवम् अशुद्धात्मतः शुद्धस्य च को विशेष ? अत आह –

स्थूलं सूक्ष्मं[5] परं ज्ञात्वा कर्म कुर्याद्यथेप्सितम्॥ ६ ॥

स्थूलं शब्द इति प्रोक्तं सूक्ष्मं चिन्तामयं भवेत्।

चिन्तया रहितं यत्तु तत् परं परिकीर्तितम्॥ ७॥

एवं ज्ञात्वैव मन्त्रज्ञः सर्वपापक्षयो भवेत्[6]।

शुद्धस्त्वाचार्यो दिवस्थं यन्नादं ज्ञात्वा . . . . कुर्यादित्युक्तम्। ज्ञानादेवास्य मन्त्राः सिद्धा भवन्ति। अशुद्धस्तु स्थूलमेव ज्ञात्वा लौकिककर्म करोतीत्यस्माच्छुद्धस्य भेदः।

---

[5] स्थूलं सूक्ष्मं-अ; स्थूलसूक्ष्मं-आ

[6] सर्वपापक्षयो भवेत्-अ;

केचित्तु नादाख्यमित्यादीनि तन्त्राणि शास्त्रविशेषतया व्याचक्षते। तत्तु व्याख्यानं स्थूलं
In Public domain. Digitization Muthulakshmi Research Academy
शब्दमिति प्रोक्तमित्यादिनोपलक्ष्यमाणेनातीत मन्त्रज्ञ आचार्यः प्रोक्तभेदभिन्नं नादं ज्ञात्वैव मलस्य पाशपर्यायत्वात् तदुपलक्षितां तद्भावनां च सर्वेषां पाशानां क्षयो भवेत्। कारणे कार्योपचारात् क्षयकरी भवेदित्यर्थः। नान्यथा यस्य (पाशक्षयसामर्थ्यमिति वक्ष्यामः ।

अथ स्थूलशब्दवचनो वाचकमन्त्रस्य संक्षिप्ता एवोद्धारः।

यवर्गादष्टमं बीजं[7] मात्रैर्द्वादशकैः स्थितम्[8] ॥ ८ ॥

अक्षरान्तस्ति . . . .   मषडङ्गः शिवो भवेत्।

प्रथमं हृदयं विद्याद्द्वितीयं तु शिरः स्मृतम् ॥ ९ ॥

तृतीयं तु शिखा चतुर्थं कवचं भवेत्। ****

पञ्चमं तु शिवं विद्यात् षष्ठमस्त्रं विसर्गजम् ॥ १० ॥

षडङ्गमेतत् कथितं शिवेन परमात्मना।

---

[7] यवर्गादष्टमं बीजं-अ; यवर्णादष्टमं बीजं-आ

[8] मात्रैर्द्वादशकैः स्थितम्-अ; मा नेत्रद्वादशभिः स्थितम्-आ; मात्राद्वादशकैः स्थितम्-em.

In Public domain. Digitization Muthulakshmi Research Academy

अस्य मुद्रां प्रवक्ष्यामि येन सिद्ध्यति साधकः[9] ॥ ११ ॥

अत्राभिविघ्नोद्यमुद्रेणानमुद्राः कथ्यन्ते हरशक्तय[10] इति श्रुतेः।

कराभिनयव्यङ्ग्या शिवशक्तिरेव मुद्रोच्यते। अनेस्य वोद्धृतस्य मन्त्रगणस्य मोदिका

विघ्नद्राञ्चैकामेव मुद्रां प्रवक्ष्यामि कथ . . . .

हस्ताभ्यां संस्पृशेत् पादौ द्वौ हस्तौ यावन्मस्तकम्।

एषा मुद्रा महामुद्रा सर्वकामार्थसाधिका ॥ १२ ॥

करन्यासं पुरा कृत्वा दर्शयीत विचक्षणः।

॥ इति श्रीमद्वातुलभेदे द्विशतिकालोत्तरे महातन्त्रे मन्त्रोद्धारपटलः प्रथमः ॥

यजनम्

यजनं सम्प्रवक्ष्यामि यथावदनुपूर्वशः।

---

[9] सिद्ध्यति साधकः-अ; सिद्ध्यन्ति साधकाः-आ

[10] साक्षात्तु हस्ताभिनयैर्हूयन्ते शिवशक्तयः। Naṭarājapaddhati, 324ab

यथावदिति स्नानादिहृद्यागा ते समस्तविध्यनतिक्रमेण यजनं संक्षेपतो वक्ष्यामि । सर्व
In Public domain. Digitization Muthulakshmi Research Academy
एवास्यां भूतास्त इत्यर्थः। अत एव चैवदत्र प्रकृतिभूतं सर्वाङ्गपरिपूर्णत्वान्मण्डलयागादीनि त्वेतदाकांक्षत्वाद्विकृतिभूतानि बाह्ययजनस्य चाधारपक्षत्वादत्र चावाहनानन्तरं स्नपनस्य श्रुतेः। तस्य च लिङ्गाविनाभावाल्लिङ्गलक्षणं तत्प्रतिष्ठादि च शास्त्रान्तरप्रसिद्धमित्यनेनोपात्तमनुपूर्वश इत्यनेन द्वारपालपूतात्मशुद्ध्याद्यनुपूर्विका विधीयते। अत्र हि दीक्षितः कृतावश्यकः शौचविधिस्नाता शिघ्यात्र स्नानवर्जितादाग्नेयस्नानस्त्रिकालानुरूपं ध्यानविशेषो विहितमार्जनाघमर्षणतर्पणोपस्थानो निर . . . . रायः सौम्यास्य उपविन्य (उपविश्य ?) करन्यासपूर्वं निरस्ताशुद्धतनुः विहितशक्तिशरीरोवसाधितान्तर्यजनहोमध्यानस्थानशुद्धिमर्घ्यपात्रकरणपूर्वद्रव्यशुद्धिम् आत्मपूजां मन्त्रशुद्धिं च कृत्वा कृतगणपतिगुस (गुरु ?)पूजोपक्रमेत्।

हृदयं कर्णिकापद्मं[11] धर्मज्ञानादिकं तथा[12] ॥ १ ॥

---

[11] कर्णिकापद्मं-अ; कण्टकापद्मं-आ;

[12] धर्मज्ञानादिकं तथा-अ; धर्मज्ञानादिमेव च-आ

वैराग्यं च तथैश्वर्यं हृदयप्रभविन्न्यसेत्[13]।

In Public domain. Digitization Muthulakshmi Research Academy

केसरैः शक्तयो व्यूहं हृदयेन तु कारयेत्॥ २॥

पद्मं च कर्णिकापद्मं हृदयमिति समानाधिकरणानिर्देशात् हृदयस्य सद्भावार्थतया साक्षाच्छिवशक्त्यधिष्ठेयत्वेन शुद्धविद्यापद्मं चास्य ख्यापते (ख्यापिते?) ततश्च पद्मादिहृदयेन न्यसेदित्यर्थः। धर्मज्ञानादिमिति ध . . . . तानं च तयोरादिमधिकरणमनन्तश्चेत्यर्थः। एवं च शब्देन मायात्महृदयेन प्रभव आत्मलाभो यस्य तं तथा न्यसेत्। हृदयेन न्यसेदित्यर्थः। अत्र चार्थ एवानुसक्त . . . . पाठक्रमादर्थकामो बलीयानिति । ततश्चाधारशक्तिं प्रथम पुरा शक्त्या प्रणवेन सम्पूज्य पश्चात् सासनमनन्तं धर्मादिपादचतुष्टयमधच्छदने हृदयेन न्यस्य ततः शिवासनपद्मकर्णिकायां च . . . . नैव न्यसेत्। ततश्च केसरैः सहायः शक्तयः तदधिकरणा स्थिता। वामादिरष्टौ शक्तीः शास्त्रान्तरापेक्षया प्रागादिदिगष्टके कर्णिकायां मनोन्मनीं च न्यसेत्। अनु व्यूहं सू . . . . संज्ञं ब्रह्मविष्णुरुद्राधिपात्मविद्याशिवतत्त्वरूपं मण्डलत्रयं हृदयेन तु कारयेत्। केचित्तु शक्तिमण्डलमपि परतत्त्वाभिव्यक्तिपदं संगृहीतं तु

[13] हृदयप्रभविन्यसेत्-अ; हृदयप्रभवं न्यसेत्-आ

शब्दसंनिधानाच्चात्र हृदयशब्देन शक्तिना . . . . दः कथ्यत इत्याहुः। शुद्धं शिवासनं
In Public domain. Digitization Muthulakshmi Research Academy

संकल्प्य

आवाहयेत्ततो देवं हृदयेन तु साधकः।

स्थापनं पाद्यमर्घ्यं चाचमनीयं च मन्त्रवित् *** ॥ ३ ॥

पद्मं च कर्णिकापद्मं हृदयमिति समानाधिकरणानिर्देशात् हृदयस्य सद्भावार्थतया साक्षाच्छिवशक्त्यधिष्ठेयत्वेन शुद्धविद्यापद्मं चास्य ख्यापते (ख्यापिते?) ततश्च पद्मादिहृदयेन न्यसेदित्यर्थः। धर्मज्ञानादिमिति ध . . . . तानं च तयोरादिमधिकरणमनन्तश्चेत्यर्थः। एवं च शब्देन मायात्महृदयेन प्रभव आत्मलाभो यस्य तं तथा न्यसेत्। हृदयेन न्यसेदित्यर्थः। अत्र चार्थ एवानुसक्त . . . . पाठक्रमादर्थकामो बलीयानिति । ततश्चाधारशक्तिं प्रथम पुरा शक्त्या प्रणवेन सम्पूज्य पश्चात् सासनमनन्तं धर्मादिपादचतुष्टयमधच्छदने हृदयेन न्यस्य ततः शिवासनपद्मकर्णिकायां च . . . . नैव न्यसेत्। ततश्च केसरैः सहायः शक्तयः तदधिकरणा स्थिता। वामादिरष्टौ शक्तीः शास्त्रान्तरापेक्षया प्रागादिदिगष्टके कर्णिकायां मनोन्मनीं च न्यसेत्। अनु व्यूहं सू. . . . संज्ञं ब्रह्मविष्णुरुद्राधिपात्मविद्याशिवतत्त्वरूपं मण्डलत्रयं

हृदयेन तु कारयेत्। केचित्तु शक्तिना[illegible]मपि परतत्त्वाभिव्यक्तिपदं संगृहीतं तु In Public domain. Digitization Muthulakshmi Research Academy

शब्दसंनिधानाच्चात्र हृदयशब्देन शक्तिना . . . . दः कथ्यत इत्याहुः। शुद्धं शिवासनं

संकल्प्य

स्नपनं पूजनं[14] चैव हृदयेन तु कारयेत्।

एषां चोपलक्षणत्वाच्चकारसमुच्चयावाहनस्थापनसंनिधानसंनिरोधन-महान्यासममृतीकरणं

पाद्याचमनार्घ्यदानं दूर्वापुष्पाक्षतादिदानमिति दशसंस्कारान् तथा स्वप्नपरिकरमभ्यङ्गोद्वर्जन

(द्वर्तन ?)निमज्जननीराजनमभिषेचनान्ते

सुसितवस्त्राभरणगन्धपुष्पादिपूजनधूपदीपादिरात्रिक (आरात्रिक ?)प्रवर्तनमावेद्य

मुखवासताम्बूलादिदानं पुनर्धूपदानं दर्पणछत्रचामरादिविभ्वं पवित्रोपपादानं सर्वं

जपादिनिवेदनान्तं कर्म हृदयेनैव

कुर्यात् ।एतदेवाह –

हृदयेनैव तत्सर्वं यत् किंचिद्विधिचोदितम्॥ ४॥

---

[14] स्नपनं पूजनं-अ स्नपनपूजनं-आ

विधिं मूलशान्तं सुतन्त्रोक्तम् (स्वतन्त्रोक्तम् ?)इहानपातं सर्वमित्यर्थः। समानतन्त्रेऽप्युक्तम् –

In Public domain. Digitization Muthulakshmi Research Academy

उक्तानुक्तं तु यत्किंचित् तत्सर्वं हृदयेन तु । इति।

पुनः पुनरभिधानामन्त्रान्तरसाध्यमपि (अभिधानम् ?) सर्वं कर्म तत्तथा कारेणैतदेव

साधयति नियम इति।

अथ किमत्र वरुणपूजा (आवरणपूजा ?) न वेति । अत आह-

एकावरणमेतत्तु सर्वकामार्थसाधकम्[15]।

सर्वतन्त्रेषु सामान्यं सर्वज्ञानेषु सम्मतम्॥५॥

॥इति श्रीमद्विशतिकालोत्तरे यजनपटलो द्वितीयः॥

आग्नेय्यां हृदयं न्यसेदित्यादिमण्डलप्रकरणवक्ष्यमाण आवरणपूजाप्रकारो नेत्र वाकरण इति

विशेषणबलादावरणपूजायाः शोभाहेतुत्वादुपतिष्ठते । यदुक्तं श्रीमत्पराख्ये-

अनावृतो न शोभार्हः । इति।

---

[15] सर्वकामार्थसाधकम्-अ; सर्वकर्मार्थसाधकम्-आ

 In Public domain. Digitization Muthulakshmi Research Academy

पत्या हि यमा नामा नाभात्यनावृतम् । इति।

नन्वावरणपूजासूत्रं मण्डलप्रकरणेन विरुद्धं न सर्व नमव वाक्यं प्रकरणेन विरुद्धम् । न सर्वमेव वाक्यं प्रकारेण (प्रकरणेन ?) नावरोद्धुं शक्यम्। प्रकरणात् वाक्यस्य बलीयस्त्वोक्तश्चात्र पूजान्ते नैवेद्यदानात् पूर्वावरणपूजा कार्येति सिद्धम्। अपविधिश्च प्रासादजपप्रकरणादत्रोपतिष्ठते। आवाहनस्य पूजानभ्यर्थं च तत्समाप्तिनिवेदनाय परां दुःखादानपूर्वलिङ्गाद्याधारवशात् सापेक्षनिरपेक्षा वापि विसर्जनं कथ्यते। एतच्च कामत इति कामो नित्यनैमित्तिकमन्त्राराधनादि तेषां सर्वेषां प्रयोजनमेकावरणमेव व्याधयति ?। किंचेदं सर्वतन्त्रेषु सामान्यं सर्वाश्रिततन्त्राणि स्रोतोऽन्तराणि तैश्च तमुक्तानि फलान्युपलक्ष्यन्ते। तेषु बलेष्वप्येतत् साधारणं तानि च साधयतीत्यर्थः। ततस्तं फलार्थिनामप्येतदेवानुष्ठेयम्। किं च सर्वज्ञानेषु सम्मतं सर्वेषु ज्ञानेषु कामिकादिसिद्धान्तशास्त्रेषु सम्मतं तैरविरुद्धमित्यर्थः । एवमुक्तम् भवति – एकावरणमप्यनेकावरणबलं न व्यभिचरतीति।

॥ इति लक्षद्वयाध्यापकश्रीमदघोरशिवाचार्यविरचितायां श्रीमद्विंशति (द्विशति)कालोत्तरवृत्तौ

In Public domain. Digitization Muthulakshmi Research Academy

यजनप्रकरणं द्वितीयम् ॥

 In Public domain. Digitization Muthulakshmi Research Academy

अतः परम् प्रवक्ष्यामि अग्निकार्यविधिक्रमम्।

अतोऽर्चनानन्तरं परं शैवमग्नेः कार्याय उत्पादनार्थं यो विधिक्रमः तस्मिंश्चाग्निभयः(मयः?)

कार्यः मन्त्रार्चनतद्धोम . . . .

तमाह –

उल्लेखनं तु चास्त्रेण[16] कवचेनोक्षणं स्मृतम्॥ १ ॥

अत्र कुत्रत्योल्लेखनमित्यपेक्षायां –

आग्नेय्यां कारयेत् कुण्डं हस्तमात्रसमन्ततः ।

इति मण्डलप्रकरणात् वाक्यमुपतिष्ठते। तस्य च विशेषान्तराभिधानात्

मेखलाप्रमाणादिसहिता . . . .   further portion of comm. Not found.

---

[16] चास्त्रेण-अ; शास्त्रेण-आ (शस्त्रेण em.)

शक्तिन्यासं ततो मन्त्री हृदयेन तु कारयेत्।
In Public domain. Digitization Muthulakshmi Research Academy

हृदैव शक्तिगर्भे तुप्रक्षिपेज्जातवेदसम्॥२॥

होमयेत्तु शिवं साङ्गं सर्वसिद्धिप्रदायकम्।

अभूतं यत् परं वत्स स्रवन्तं मनसा स्मरेत्॥३॥

॥इति द्विशतिकेऽग्निकार्यपटलस्तृतीयः॥

मण्डलविधिः

अतः परं प्रवक्ष्यामि मण्डलं सार्वकामिकम्।

सूत्रेण सुमितं कृत्वा चतुरश्रं समन्ततः॥१॥

मध्ये पद्मं प्रतिष्ठाप्य अष्टपत्रं सकर्णिकम्।

एकहस्तं द्विहस्तं वा चतुर्हस्तमथापि वा॥२॥

एकावरणमेतत्तु सर्वकामार्थसाधकम्।

पश्चिमं वाहयेद्द्वारं सिद्धिकामः समाहितः॥३॥

आग्नेय्यां कारयेत् कुण्डं हस्तमात्रं समन्ततः[17]।

In Public domain. Digitization Muthulakshmi Research Academy

यज्ञकर्मविधिं कुर्यात् सुसमिद्धे हुताशने॥ ४॥

आग्नेय्यां हृदयं न्यस्य ऐशान्यां तु शिरो न्यसेत्।

नैर्ऋत्यां तु शिखां विद्याद्वायव्यां कवचं न्यसेत्॥ ५॥

अस्त्रं दिक्षु च विन्यस्य कर्णिकायां सदाशिवम्।

संक्षेपेण मया स्कन्द विधानं परिकीर्तितम्॥ ६ ॥

अनुक्तं यद्भवेत् किंचित् तत्सर्वं मूलमाश्रयेत्।

एवं विधिविधानज्ञो बुद्धा कर्म समाचरेत्॥ ७॥

॥ इति श्रीमद्द्विशतिकालोत्तरे मण्डलविधिपटलश्चतुर्थः ॥

अथ दीक्षां प्रवक्ष्यामि पञ्चतत्त्वव्यवस्थिताम्।

---

[17] हस्तमात्रं समन्ततः-अ; हस्तमात्रसमन्ततः-आ

अथ नाडीसंधानपर्यन्तात् प्रागुक्तत् (क्तात्?) कर्मकलापात् अनन्तरं

In Public domain. Digitization Muthulakshmi Research Academy

मलपरिपाकशक्तियुक्तानां कृतसमयादधिवासकर्मणां शिष्याणां

दीक्षापाशशोधनशिवत्वाभिव्यक्त्युपाय . . . . यच्छ्रूयते –

दीयते ज्ञानसद्भावः क्षीयते पाशवासना।

दानक्षपणयोगात्तु दीक्षाकृतात्मना । इति।

पृथिव्यापस्तथा तेजो वायुराकाशमेव च॥ १॥

र्तांनि[18] पञ्चतत्त्वानि यैर्व्याप्तमखिलं जगत्[19]।

सर्वतत्त्वानि तत्रैव द्रष्टव्यानि तु देशिकैः॥ २॥

अज्ञात्वैतानि तत्त्वानि[20] यो दीक्षां कर्तुमिच्छति[21]।

---

[18] र्तांनि-अ; एतानि-em.

[19] यैर्व्याप्तमखिलं जगत्-अ; तैर्व्याप्तमखिलं जगत्-आ

[20] अज्ञात्वैतानि तत्त्वानि-अ; अज्ञात्वेतानि -आ

[21] कर्तुमिच्छति-अ; कर्तुमर्हति-आ

वृथा परिश्रमस्तस्य नैतत् फलमवाप्नुयात् ॥ ३ ॥
In Public domain. Digitization Muthulakshmi Research Academy

निवृत्तिः पृथिवी ज्ञेया प्रतिष्ठा ह्याप[22] उच्यते।

विद्या तेजोमयी प्रोक्ता वायुः शान्तिश्च कीर्तिता[23] ॥ ४ ॥

शान्त्यतीतं[24] परं व्योम तत्परं शान्तमव्ययम्।

तं विदित्वा महासेन स्थावरानपि दीक्षयेत्[25] ॥ ५ ॥

निवृत्तिं हृदयेनैव प्रतिष्ठां शिरसा बुधः।

विद्यातत्त्वं च शिखया शान्तिं कवचेन तु[26] ॥ ६ ॥

शान्त्यतीतं परं व्योम प्रासादेन तु होमयेत्।

---

22 ह्याप-अ; आप-आ

23 कीर्तिता-अ; कीर्तिताः-आ

24 शान्त्यतीतं-अ; शान्त्यतीता- आ

25 स्थावरानपि दीक्षयेत्-अ, आ (व्याख्यानेऽयं पाठ उद्धृतः)

26 शान्तिं कवचेन तु-अ; शान्तिकं कवचेन तु-आ

एकैकस्य शतं होम्यं पश्चात् पूर्णाहुतिं तदा[27] ॥७॥

In Public domain. Digitization Muthulakshmi Research Academy

एवं समाप्यते दीक्षा जननादिविवर्जिता[28]।

हुतेनैव तु मुच्यन्ते साधका जन्मबन्धनात्॥८॥

अप्रकाश्यमिदं दृष्टं गोपनीयं प्रयत्नतः।

रहस्यं सर्वतन्त्राणामिदं संस्कारमुत्तमम्॥९॥

एवं संस्कारशुद्धस्य शिवत्वं जायते ध्रुवम्।

कार्त्तिकेय उवाच-

विस्तरं त्यज[29] देवेश संक्षेपात् कथयस्व मे॥१०॥

येन विज्ञानमात्रेण पशून् मोचयति क्षणात्।

ईश्वर उवाच-

---

[27] पश्चात् पूर्णाहुतिं तदा-अ; ***

[28] जननादिविवर्जिता-अ; ***

[29] विस्तरं त्यज-अ; विस्तारं त्यज-आ

श्रृणु षण्मुख तत्त्वेन येन मोक्षो भवेद्ध्रुवम्[30] ॥ ११ ॥

In Public domain. Digitization Muthulakshmi Research Academy

प्रयोगेण तु सूक्ष्मेण योगदृष्टेन मन्त्रवित्।

योगमार्गेण दिव्येन प्रेर्यते समशक्तिना ॥ १२ ॥

तं विदित्वा महासेन जीवं वायुमयं बुधः।

विषुवेन तु योगेन योजयेच्छाश्वते पदे ॥ १३ ॥

योगं तु विषुवं प्राप्य को न मुच्येत बन्धनात्।

॥ इति श्रीमद्वातुलभेदे द्विशतिकालोत्तरे महातन्त्रे दीक्षापटलः पञ्चमः ॥

नाडीचक्रम्

नाडीचक्रमिदं सूक्ष्मं प्रवक्ष्याम्यनुपूर्वशः।

---

[30] मोक्षो भवेद्ध्रुवम्-अ; मोक्षो ध्रुवं भवेत्-आ

In Public domain. Digitization Muthulakshmi Research Academy

नाभेरधस्ताद्यत् स्कन्दम् अङ्कुरास्तत्र निर्गताः[31] ॥१॥

[32]द्वासप्ततिसहस्राणि नाभिमध्ये व्यवस्थिताः।

तिर्यगूर्ध्वमधश्चैव व्याप्नुवन्ति तु सर्वदा॥२॥

चक्रवत् संस्थिता ह्येता नाड्यः परिकीर्तिताः।

इडा च पिङ्गला चैव सुषुम्ना च तृतीयका॥३॥

गान्धारी हस्तिजिह्वा च पूषा चैव यशा तथा[33]।

अलम्बुषा कुहू चैव शङ्खिनी दशमी स्मृता॥४॥

दश प्राणावहा ह्येतो नाड्यः परिकीर्तिताः।

प्राणोऽपानः समानश्चोदानोऽपि व्यान एव च॥५॥

नागः कूर्मोऽथ कूकरो देवदत्तो धनञ्जयः।

---

[31] अङ्कुरास्तत्र निर्गताः-अ; प्रवालाङ्कुरसंनिभम्आ

[32] द्वासप्ततिसहस्राणि . . . परिकीर्तिताः पर्यन्तं सार्धैकश्लोकः 'आ' कोशे नास्ति।

[33] यशा तथा-अ; यथा तथा-आ

प्राणस्तु प्रथमो वायुर्नवानामपि स प्रभुः ॥ ६ ॥ In Public domain. Digitization Muthulakshmi Research Academy

प्राणः प्राणमयः प्राणो विसर्गात् पूरणं प्रति।

नित्यमापूरयेत् तेषु प्राणिनामुपरि स्थितः ॥ ७ ॥

निःश्वासोच्छ्वासकासैस्तु प्राणो जीवः समाश्रितः।

प्रयाणं कुरुते यस्मात् तस्मात् प्राणः प्रकीर्तितः ॥ ८ ॥

अपानयत्यपानस्तु आहारम् मनुजामधः।

शुक्लमूत्रवहो वायुरपानस्तेन कीर्तितः ॥ ९ ॥

पीतम् भक्षितमाघ्रातरक्तपित्तकफानि च।

समन्नयति गात्रेषु समानो नाम मारुतः ॥ १० ॥

स्पन्दयत्यधरं वक्त्रं नेत्रगात्रप्रकोपनम्।

उद्वेजयति कर्माणि उदानो नाम मारुतः ॥ ११ ॥

व्यानो विनामयत्यङ्गं व्यानो व्याधिप्रकोपनः।

प्रीतेर्विनाशकः ख्यातो वार्धक्याद्यान उच्यते ॥ १२ ॥

In Public domain. Digitization Muthulakshmi Research Academy

प्राणाद्या वायवः प्रोक्ता नागाद्याः प्रोच्यतेऽधुना।

उद्गारे नाग इत्युक्तः कूर्म उन्मीलने स्थितः ॥ १३ ॥

कूकरः क्षिधिते चैव देवदत्तो विजृम्भने।

धनञ्जयः स्थितो घोषे मृतस्यापि न मुञ्चति ॥ १४ ॥

इत्येतद्वायुबृन्दं हृदि हृदि निहितं नाभिचक्रप्रतिष्ठन्निश्वासोछ्वासकासैः श्वसन उर अधः कम्पिताघूर्णितैश्च।

बिजन्नित्याल्पक . . . . ति . . . . यौवने बालभावे

चाक्रान्ते वायुरेको विधुननमरणैः क्रीडते सर्वसत्वैः ॥ १५ ॥

नाडीचक्रं यथावस्थम् . . . . तवाखिलम्।

. . . . द शारं चक्रमेतत्तु विभागो जायते तथा ॥ १६ ॥

चक्रवद्भ्राम्यते जीवो दशस्थानेष्वनुक्रमात्।

जी . . . . जीवलोकस्य . . . . नैष हितैः ॥ १७ ॥

दश . . . . श्छते येन तेन चक्रं प्रकीर्तितम्।

In Public domain. Digitization Muthulakshmi Research Academy

नाडीचक्रमिति ख्यातम् . . . .क्रमतेऽस्य सा॥ १८॥

कार्त्तिकेय उवाच-

स जीवो जीवलोकस्य तत्वतो ज्ञायते यथा।

संशयो मे महानत्र प्रसादी भव ईश्वर॥ १९॥

ईश्वर उवाच-

जीवस्य पुरुषाख्यस्य दर्शनं श्रृणु षण्मुख।

कथयामि न सन्देहः पुत्रस्नेहाद्विशेषतः॥ २०॥

स सङ्क्रान्तिर्विषुवं चैव अहोरात्रायनानि च।

अधिमासतृणं चैव औमरात्रधनं तथा॥ २१॥

औमरात्रम् भवेद्धिक्का अधिमासो विजृम्भतः।

ऋणम् चात्र भवेत् कासो . . . . नमुच्यते॥ २२॥

उत्तरं दक्षिणं ज्ञेयं वामदक्षिणसंज्ञितम्।

मध्ये तु विषुवं प्रोक्तं पुटद्वयविनिःसृतम् ॥ २३ ॥

In Public domain. Digitization Muthulakshmi Research Academy

सङ्क्रान्तिः पुनरस्यैव स्थानात् स्थानयोगतः।

इडा चैव सुषुम्ना च अमाया च समन्विता ॥ २४ ॥

सुषुम्ना मध्यमे ह्यङ्गे इडा वामे प्रतिष्ठिता।

. . . . मा वै दक्षिणे स्कन्द एष सङ्क्रान्तिरुच्यते ॥ २५ ॥

ऊर्ध्वप्राणोऽप्यहश्चैव अपानो रात्रिरेव च।

विभागान् दश प्राणस्य यो वेत्येवं स वेदवित् ॥ २६ ॥

प्राणायामान् समासेन कथयामि तवाधुना।

उच्चारयीत प्रणवं स्वरेणैकेन मन्त्रवित् ॥ २७ ॥

उदरं पूरयेत्तावद्वायुना यावदीप्सितम्।

प्राणायामो भवेदेषः पूरको देहपूरकः ॥ २८ ॥

पिधाय सर्वद्वाराणि निश्वासोछ्वासवर्जितः।

सम्पूर्णकुम्भवत्तिष्ठेत् प्राणायामस्तु कुम्भकः ॥ २९ ॥

मुञ्चेद्वायुं ततस्तूर्ध्वं श्वासेनैकेन मन्त्रवित्। In Public domain. Digitization Muthulakshmi Research Academy

उछ्वासयोगयुक्तस्तु वायुमूर्ध्वं विरेचयेत्॥ ३०॥

रेचकस्त्वेष विख्यातः प्राणसंशयकारकः।

योऽसौ हृदि स्थितः पद्म अधोमुखमवस्थितम्॥ ३१॥

विकसन्ति स वै पद्म पूरकेण तु पूरिताः।

ऊर्ध्वस्रोतो भवेत् पद्म कुम्भकेन तु रोधितः॥ ३२॥

रेचकेन तु आक्षिप्तः सद्यःप्राणहरेण तु।

मुक्त्वा हृदयपद्मं तु ऊर्ध्वस्रोतो व्यवस्थितः॥ ३३॥

रेचिति गच्छति ह्यूर्ध्वं ग्रन्थीन् भित्वा क्रमेण तु।

हित्वा कवालचारं तु जीवो ह्यूर्ध्वं तु रेचितः॥ ३४॥

सदाशिवपदं गत्वा न भूयो जन्म चाप्नुयात्।

आयामः क्रियते तस्य नान्यदा तु कदाचन॥ ३५॥

स जीवो जीवलोकस्य मया प्रोक्तः समासतः।

उच्चरन्ति स्वयं यस्मात् स्वदेहावस्थितः शिवः॥ ३६॥

तस्मात् तत्त्वविदां वत्स स एव जप उच्यते।

In Public domain. Digitization Muthulakshmi Research Academy

अयुते द्वे सहस्रैकषट्छतानि तथैव च॥ ३७॥

अहो रात्रेण योगीन्द्रो जपसंख्यां करोति सः।

॥ इति श्रीमद्वातुलभेदे द्विशतिकालोत्तरे महातन्त्रे नाडीचक्रपटलः षष्ठः॥

ज्ञानसद्भावम्

अतः परं प्रवक्ष्यामि ज्ञानसद्भावमुत्तमम्।

येन विज्ञानमात्रेण गृह्णाति न पुनस्तनुम्॥ १॥

देहस्थः सकलो ज्ञेयो निष्कलो देहवर्जितः।

आप्तो देशगम्योऽसौ सर्वतः किमपि स्थितः॥ २॥

हंस हंसेति यो ब्रूयाद्धंसो देवः सदाशिवः।

गुरुवक्त्रात्तु लभ्येत प्रत्यक्षं सर्वतोमुखम्॥ ३॥

तिलेषु च यथा तैलं पुष्पे गन्धः समाश्रितः।

पुरुषस्य तथा देहे सबाह्याभ्यन्तरे स्थितः॥ ४॥

उल्काहस्तो यथा कश्चिद्द्रव्यमालोक्य तां त्यजेत्।

ज्ञानेन ज्ञेयमालोक्य तथा ज्ञानं परित्यजेत्॥५॥

In Public domain. Digitization Muthulakshmi Research Academy

पुष्पं तु सकलं विद्याद्गन्धस्तस्यैव निष्कलः।

वृक्षं तु सकलं स्कन्दश्छाया तस्यैव निष्कल॥६॥

सकाकलभावेन सर्वत्रैव व्यवस्थितः।

सकले सकलं विद्यान्निष्कले निष्कलं तथा॥७॥

त्रिमात्रस्तु द्विमात्रस्तु एकमात्रस्तथैव च।

अर्धमात्रः परः सूक्ष्मस्तस्याप्यूर्ध्वं परात्परम्॥८॥

ब्रह्मा विष्णुश्च रुद्रश्च ईश्वश्च शिवस्तथा।

पञ्चधा पञ्चदैवत्यः सकलः परिपठ्यते॥९॥

ब्रह्मणो हृदयं स्थानं कण्ठे विष्णुः समाश्रितः।

तालुमध्ये स्थितो रुद्रो ललाटे तु महेश्वरः॥१०॥

नासाग्रे तु शिवं विद्यात् तस्यान्ते तु परात्परम्।

परात्परतरं नास्ति इति शास्त्रस्य निश्चयः॥११॥

कार्त्तिकेय उवाच-

गागमः कथं तस्य केन वा नीयते तु सः।

संशयो मे महादेव कथयस्व यथार्थतः॥ १२॥

In Public domain. Digitization Muthulakshmi Research Academy

ईश्वर उवाच-

शक्त्या तु नीयते जीवस्तस्मिन् प्राप्ते निवर्तते ।

तस्यान्तं सम्प्रविक्ष्यामि श्रृणु षण्मुख तत्त्वतः॥ १३॥

देहातीतं तु तं विद्यानान्नादान्तं द्वादशाङ्गुलम्।

अन्तःस्थितं विजानीयात् तत्रस्थो व्यापयेत् प्रभुः॥ १४॥

मनोऽप्यन्यत्र निक्षिप्तं चक्षुरन्यत्र पातितम्।

तथापि योगिनां योगोऽप्यविच्छिन्नः प्रवर्तते॥ १५॥

एतत्तत्परमं गुह्यं एतत्तत्परमं पदम्।

एतत्तत्परमं ब्रह्म एतत्तत्परमाक्षरम्॥ १६॥

नातः परतरं ज्ञानं नातः परतरं शिवम्।

नातः प्रतरं किंचिदित्याह भगवान् शिवः॥ १७॥

शिवज्ञानामृतम् प्रोक्तं संक्षेपान्नतु विस्तरात्।

अवाप्तं देवदेवेशात् परमाक्षरनिर्णयम्॥ १८॥

एतद्धि शिवसद्भावं शिववक्त्राद्विनिःसृतम्।

गुह्याद्गुह्यतरं गुह्यं गृहीतव्यम् प्रयत्नतः ॥ १९ ॥

In Public domain. Digitization Muthulakshmi Research Academy

नापुत्राय प्रदातव्यं न शिशिष्याय कदाचन।

देवाग्निगुरुभक्ताय मात्सर्यरहिताय च ॥ २० ॥

तस्मै देयमिति ज्ञानं नान्यस्मै तु कदाचन।

शिवज्ञानमिदम् प्रोक्तं सत्यं सत्यं मया तव ॥ २१ ॥

एवम् ज्ञात्वा तु मेधावी विचरेत् स्म यथासुखम्।

गृहस्थोब्रह्मचारी वा वानप्रस्थोऽथ भिक्षुकः ॥ २२ ॥

यत्र तत्र स्थितो ज्ञानी परमाक्षरवित् सदा।

विषयी विषयासक्तो याति देहान्तिके शिवम् ॥ २३ ॥

ज्ञानादेवास्य शास्त्रस्य पापसक्तोऽपि मानवः।

ब्रह्महत्यश्वमेधाद्यैः पुण्यपापैर्न लिप्यते ॥ २४ ॥

चोदको बोधकश्चैव मोक्षदस्तु परस्मृतः।

इत्येतत् त्रिविधा ज्ञेया आचार्यस्तु महीतले ॥ २५ ॥

चोदकी दर्शयेन्मार्गं बोधकः स्थानमादिशेत्।

मोक्षदस्तु परं तत्त्वं यं ज्ञात्वा न निवर्तते ॥ २६ ॥

॥ इति श्रीमद्वातुलभेदे द्विशतिकालोत्तरे महातन्त्रे ज्ञानसद्भावपटलः सप्तमः ॥

In Public domain. Digitization Muthulakshmi Research Academy

अग्निष्टोमः

अग्निमध्ये रविस्थानं रविमध्ये तु चन्द्रमाः।

तन्मध्ये चाङ्कुरो दिव्यस्ततः सृष्टिः प्रवर्तते॥ १॥

सृष्टिन्यासं न्यसेत्तत्र द्विरभ्य . . . . पदेरितम्।

स्रवन्तं चिन्तयेत्तस्मिन्नमृतं साधकोत्तमः॥ २॥

अग्निष्टोमात्मकं सर्वं जगत् स्थावरजङ्गमम्।

विपरीतं चिन्तयेत् तस्मिन् सिद्धिकामः समाहितः॥ ३॥

स्वदेहं चिन्तयेद्विद्वान् दिव्यरूपमनौपमम्।

यस्य यत् कर्म निर्दिष्टं तस्य तच्चिन्तयेद्बुधः॥ ४॥

इदं योऽभ्यसते ध्यानममृतं सर्वतोमुखम्।

अचिरेणैव कालेन स सिद्धिफलभाग्भवेत्॥ ५॥

सृष्टिन्यासमविज्ञाय कथं युञ्जीत साधकः। In Public domain. Digitization Muthulakshmi Research Academy

घ्नन्तीव मुष्टिना कशं कुट्टयन्ति तुषानि च॥ ६ ॥

॥ इति श्रीमद्वातुलभेदे द्विशतिकालोत्तरे महातन्त्रे अग्निष्टोमीयोऽष्टमः पटलः ॥

प्रासादः

प्रासाद नादमुत्थाप्य सन्ततं तु जपेद्यदि।

षण्मासात् सिद्धिमाप्नोति योगयुक्तो न संशयः॥ १ ॥

गमागमस्य जापेन सर्वपापक्षयो भवेत्।

अणिमादिगुणैश्वर्यं षड्भिर्मासैरवाप्नुयात्॥ २ ॥

गमागमं विदित्वा तु मुच्यते नात्र संशयः।

तल्लयस्तन्मयो भूत्वा षण्मासात् सिद्धिमाप्नुयात्॥ ३ ॥

स्थूलः सूक्ष्मः परश्चेति प्रासादः कथितो मया।

In Public domain. Digitization Muthulakshmi Research Academy

प्रासादं ये न जानन्ति ते न जानन्ति शंकरम्॥४॥

॥ इति श्रीमद्वातुलभेदे द्विशतिकालोत्तरे महातन्त्रे प्रासादपटलो नवमः॥

 In Public domain. Digitization Muthulakshmi Research Academy

अतः परं प्रवक्ष्यामि प्रासादस्य तु लक्षणम्।

ह्रस्वो दीर्घः प्लुतश्चेति लक्षयेन्मन्त्रवित् सदा॥ १॥

ह्रस्वो दहति पापानि दीर्घो मोक्षप्रदो भवेत्।

आप्यायने प्लुतश्चेति मूर्ध्नि बिन्दुविभूषितः॥ २॥

स्थूलभेदास्त्रयः प्रोक्ता वश्योच्चाटनमारणाः।

प्लुतोऽपि हि सदावश्यं कुरुते नात्र संशयः॥ ३॥

दीर्घश्चोच्चाटयेत् क्षिप्रं फट्कारेण नियोजितः।

आदावन्ते च ह्रस्वस्य फट्कारो मारणे हितः॥ ४॥

आदावन्ते च हृदयमाकृष्टौ सम्प्रकीर्तितम्।

आकर्षयेद्ध्रुवं युक्तो योजनानां शतैरपि॥ ५॥

एवमाकर्षयेत् साध्यं नाम ज्ञात्वा तु तत्त्वतः।

साधकस्य भवेद्वह्नी न्यूना साध्यस्य कीर्तिता॥ ६॥

एवं ज्ञात्वा तु मेधावी आकर्षं कुरुते ध्रुवम्।

In Public domain. Digitization Muthulakshmi Research Academy

अविदित्वा त्विदं सम्यङ्नैव सिद्ध्यति साधकः॥७॥

योगं कृत्वा तु पूर्वोक्तं मन्त्रस्यार्घ्यं प्रदापयेत्।

सेकं कृत्वा तु मन्त्रस्य जपं कुर्याद्विचक्षणः॥८॥

देवस्य दक्षिणामूर्तौ पञ्चलक्षं स्थितो भवेत्।

जपान्ते घृतहोमस्तु दशसाहस्त्रिको भवेत्॥९॥

एवमाप्यायितो मन्त्रः कर्मयोग्यो भवेत्ततः।

उक्तानि यानि कर्माणि तानि सिध्यन्ति संशयः॥१०॥

दशलक्षं जपेद्यस्तु जना स्वस्थानवासिनः।

वशमायान्ति वै तस्य शस्त्रस्येति विनिश्चयः॥११॥

लक्षपञ्चदशं जप्त्वा दशग्रामनिवासिनः।

ते जना वशमायान्ति धनेनात्मनापि च॥१२॥

जप्तैर्विंशतिभिर्लक्षैः प्रासादस्य षडानन।

In Public domain. Digitization Muthulakshmi Research Academy

देशदेशाधिपं मन्त्री नियतं वशमानयेत्॥ १३ ॥

पञ्चविंशतिभिर्लक्षैः विषयं वशमानयेत्।

त्रिंशल्लक्षाणि जप्त्वा तु मण्डलं वशमानयेत्॥ १४ ॥

पञ्चत्रिंशज्जपेद्यस्तु पृथ्वीशं वशमानयेत्।

चत्वारिंशज्जपेद्योऽसावीक्षते हाटकेश्वरम्॥ १५ ॥

पञ्चाशल्लक्षजापेन विद्याधरपतिर्भवेत्।

तत्रैव मोदते कालं यावदाभूतसम्प्लवम्॥ १६ ॥

॥ इति श्रीमद्वातुलभेदे द्विशतिकालोत्तरे महातन्त्रे प्रासदलक्षणपटलो दशमः ॥

ज्ञानविज्ञानपटलः।

कार्त्तिकेय उवाच-

अद्यापि संशयो देव ज्ञानविज्ञानयोः प्रभो।
In Public domain. Digitization Muthulakshmi Research Academy
कथं तद् ज्ञायते ज्ञानं कथं वा ज्ञेयमुच्यते॥ १॥

ईश्वर उवाच-

आधातं तु पुरा ज्ञात्वा पश्चादाधेयकल्पना।
आधाराधेयवित् प्राज्ञः समर्थः सर्वकर्मसु॥ २॥

पुरमाधारमित्युक्तम् आधेयस्त्वीश उच्यते।
ईशिन्येष्टे च यो मुष्टीन् सोऽस्य ईश इति स्मृतः॥ ३॥

ईशं विज्ञाय मेधावी यः सदा नन्दति स्वयम्।
पुर्यष्टकसमायुक्तो ह्यधश्चोर्ध्वं च गच्छति॥ ४॥

शब्दस्पर्शं च रूपं च रसो गन्धश्च पञ्चमः।
बुद्धिर्मनस्त्वहंकारः पुर्यष्टकमिति स्मृतम्॥ ५॥

यावदेतैर्न मुच्येत कथं मुच्येत बन्धनात्।
शब्दस्पर्शं त्यजेद्ब्राह्मे रसं वै केशवे त्यजेत्॥ ६॥

रूपगन्धौ त्यजेद्द्रुद्रे बुध्यहंकारमीश्वरे। In Public Domain. Digitization Muthulakshmi Research Academy

मनोबिन्दुं शिवे त्यक्त्वा एभिर्मुक्तः शिखी भवेत्॥७॥

॥ इति श्रीमद्वातुलभेदे द्विशतिकालोत्तरे महातन्त्रे ज्ञानविज्ञानपटल एकादशः॥

कालचक्रम्

कालचक्रविधानं तु प्रवक्ष्याम्यनुपूर्वशः।

कालचक्रमिति ख्यातं येन कालेन बुध्यते॥१॥

इडाहोरात्रचारेण अब्दत्रयं स जीवति।

द्व्यहोरात्रप्रचारेण अब्दद्वयं स जीवति॥२॥

त्र्यहोरात्रप्रचारेण अब्दमेकं स जीवति।

यथा वामा तथा चामा मध्यमा च तथैव च॥३॥

कालचक्रम् समाख्यातं पुत्रस्नेहाद्विशेषतः॥

॥ इति श्रीमद्वातुलभेदे द्विशतिकालोत्तरे कालचक्रपटलो द्वादशः॥

In Public domain. Digitization Muthulakshmi Research Academy

बृहत्कुमारिकाख्यानम्

यथा बृहत्कुमार्यौ तु प्रीत्यान्योन्यं व्यवस्थिते।

एका संयोज्यते तत्र द्वितीय दुःखमाप्नुयात्॥ १॥

संयोगात् यत् सुखं भद्रे कथयिष्यसि तन्मम।

कथयिष्याहं भद्रे सुखं यन्मे भविष्यति॥ २॥

पुरस्तामागतान् दृष्ट्वा परिष्वज्य च सोत्सुका।

यत् त्वया पूर्वमुद्दिष्टं साम्प्रतं तद्वदस्व मे॥ ३॥

अशक्ता सदहं वक्तुं यत्त्वया प्रष्टुमीहितम्।

ततोऽसावब्रवीत् क्रुद्धा किं त्वया सत्यसन्धिनी॥ ४॥

ईदृशं तादृशं वेति अनौपम्यप्रत्ययं यतः।

संयोगाद्यत् सुखं भद्रे ज्ञायन्ते न तदन्यथा॥ ५॥

अन्यथा चेदवदाम्येवं प्रत्ययस्तेन जायते।

In Public domain. Digitization Muthulakshmi Research Academy

अव्युत्पन्नस्य तत्तस्मात् कथयितुं नैव शक्यते॥ ६॥

अचिरेणैव कालेन सम्प्राप्तं तत्सुखं तथा।

यत्त्वया पूर्वमुद्दिष्टं तत्तथैव न संशयः॥

अज्ञानात् सुखमोहेन यदुक्तं तु प्रियं मया।

तत् क्षमस्व प्रिये भद्रे यथापूर्वं भजस्व माम्॥ ८॥

॥ इति श्रीमद्वातुलभेदे द्विशतिकालोत्तरे महातन्त्रे

बृहत्कुमारिख्यानपटलस्त्रयोदशः॥

प्रासादाष्टकम्

कार्त्तिकेय उवाच-

पूर्वमेतत् परिज्ञानं शिवभेदस्तथाष्टधा ।

In Public domain. Digitization Muthulakshmi Research Academy

कथं स भिद्यते देव कथयस्व प्रसादतः ॥ १ ॥

ईश्वर उवाच-

सकलं निष्कलं शून्यं कलाढ्यं खमलंकृतम्।

क्षपणं क्षयमन्तस्थं कण्ठोष्ठं चाष्टमं स्मृतम् ॥ २ ॥

प्रासादषष्ठसंयुक्तषडन्तेन समन्वितम्।

सकलं सर्वभूतस्थशिवतत्त्वं प्रकीर्तितम् ॥ ३ ॥

स्वयं निष्क्रमते यस्तु देहं त्यक्त्वा समारुतः।

निष्कलं तं विजानीयात् षड्वर्णरहितः शिवम् ॥ ४ ॥

निश्वासोच्छ्वासनं भित्वा स्थितदेहेषु काष्ठवत्।

शून्यं तत्तु विजानीयाद्धृदयेन विभावयेत् ॥ ५ ॥

चुम्बाकारेण वक्त्रेण यत्तत्त्वं श्रूयते भुवि।

कलाढ्यं तद्विजानीयादाकाशस्थं च मे शृणु ॥ ६ ॥

ऊर्ध्वनादस्य क्षीणस्य यदन्तं परिकीर्तितम्।

In Public domain. Digitization Muthulakshmi Research Academy

तत्रस्थं तं विजानीयादाकाशस्थमलंकृतम्॥७॥

व्यावृतेन तु वक्त्रेण श्रुत्वा देवं जगद्गुरुम्।

दुःखक्षपणहेतुत्वात् तस्य तत्क्षपणं स्मृतम्॥८॥

अधो नादस्य क्षीणस्य यदन्तं संव्यवस्थितम्।

अन्तस्थं तद्विजानीयादनुच्चार्यं प्रकीर्तितम्॥९॥

अष्टवर्गाष्टमे कोटिं सप्तमस्य द्वितीयकम्।

वर्गातीतं षडन्तं च सप्तमे त्रिचतुर्थकम्॥१०॥

आदिं च पुनर्योज्यं षष्ठं वै प्रथमस्य तु।

खशेखरसमायुक्तं कण्ठोष्ठ्यं चाष्टमं स्मृतम्॥११॥

एते भेदाः समाख्याता अणिमाद्यादिसाधनाः।

अनुच्चार्यमसन्दिग्धं मोक्षस्येति विधीयते॥१२॥

इति श्रीमद्विशतिकालोत्तरे सकलनिष्कलादिभेदश्चतुर्दशपटलः॥

In Public domain. Digitization Muthulakshmi Research Academy

व्याप्तिः ॥

कार्त्तिकेय उवाच-

कथं व्यापी अधश्चोर्ध्वं तिर्यक् चैव कथं भवेत्।

तन्मे ब्रूहि सद्भावं कारुण्यात्तु महेश्वर॥ १॥

ईश्वर उवाच-

यावद्देहे स्थितो जन्तुरधस्तावत् प्रकीर्तितम्।

व्याप्नोति निर्गतस्तिर्यगन्तस्थः सर्वगतस्तु सः॥ २॥

त्रिमार्गावस्थितं जन्तुं सर्वदेहेषु साधकः।

अविदित्वा न मुच्येत यद्यप्येतल्लयो भवेत्॥ ३॥

त्रिमार्गं त्रिरधिष्ठानं सर्वदेहेषु वर्तते।

यो वेत्येवमिमां व्याप्तिं स व्यापी तु न संशयः॥ ४॥

तावद्भ्रमति संसारे यावद्व्याप्तिं न विन्दति।

In Public domain. Digitization Muthulakshmi Research Academy

विदित्वा व्यापिनं देवं मुच्यते नात्र संशयः ॥ ५ ॥

यथा तृणकुलूका तु तृणाग्रं यावदागता।

उपरिष्टान्निरालम्बा तद्वज्जीवोऽत्र संस्थितः ॥ ६ ॥

ऊर्ध्वः शून्यमधःशून्यं मध्ये शून्यं निरामयम्।

त्रिशून्यं यो विजानाति मुच्यतेऽसौ ध्रुवं गुह ॥ ७ ॥

व्याप्तिश्चास्य मया प्रोक्ता संक्षेपान्नतु विस्तरात्।

अतः प्रतरं नास्ति व्यापकं व्यापकस्य तु ॥ ८ ॥

इति श्रीमद्विशतिकालोत्तरे व्याप्तिपटलः पञ्चदशः ॥

प्रत्ययः

अतः परं प्रवक्ष्यामि अष्टधा प्रत्यायो यथा।

In Public domain. Digitization Muthulakshmi Research Academy

अनग्निज्वलनं चैव वृक्षस्यालभनं तथा॥ १॥

पाशानां स्तोभनं चैव महापातकनाशनम्।

विषसंक्रमणं चैव निर्बीजीकरणं तथा॥ २ ॥

ग्रहज्वरविनाशौ च प्रत्ययोष्तविधः स्वयम्।

एवं ज्ञातुश्च विधिवत् ख्यातिः सर्वत्र जायते॥ ३॥

ओं हुं हौं हुं ओं नमः।

अग्नि स्रोतसि योक्तव्यः सहस्रोद्धातसंयुतः।

पञ्चाक्षरप्रयोगेण ज्वलत्यग्निर्न संशयः॥ ४॥

ओं हूं हौं हूं ओं नमः।

अयं च स्रोतसा तेन प्रयोगः सम्प्रदर्शितः।

शतैः पण्च्चभिरुद्धातैरालब्धो म्रियते द्रुमः॥ ५॥

ओं हूं हौं हूं ओं नमः।

पुनराप्यायने तस्य स्रोतसा वारुणेन तु।
In Public domain. Digitization Muthulakshmi Research Academy

स जीवति पुनर्वृक्षो यथा पूर्वम् तथैव च॥ ६॥

ओं ह्रीं ह्रौं ह्रूं ह्रीं ओं नमः।

प्रयोगे विषुवेनायं पाशानां स्तोभकारकः।

शतैः सप्तभिरुद्घातैः पतन्तीति न संशयः॥ ७॥

ओं ईं ह्रौं ईं ओं नमः ।

उत्थापने प्रयोगोऽयं सर्वभूतेषु तद्विदा।

तावद्भिरेव चोद्घातैर्योजनीयः प्रयत्नतः॥ ८॥

ओं ह्लां ह्लौं ह्लां ओं नमः।

तुलापुरुषयोगोऽयम् उद्घातैरयुतेन तु।

महापातकशुद्ध्यर्थं विधिवत् सम्प्रकीर्तितम्॥ ९॥

झटप्ररोहणे चायं गुरुत्वं येन जायते।

ओं ह्यं ह्यौं ह्यम् ओं नमः।
In Public domain. Digitization Muthulakshmi Research Academy

पुनरारोहणे चायं लघुत्वं जायते यथा॥ १०॥

ओं ह्वीं ह्वौं ह्वीं ओं नमः।

विषसंहारप्रयोगोऽयं स्रोतसा वारुणेन तु।

उद्घाताष्टशतेनैव विषं संहरति ध्रुवम्॥ ११॥

अनग्निज्वलने यद्वन्निर्बीजीकरणे तथा।

शतैः पञ्चभिरुद्घातैर्विशेषोऽत्र विधीयते॥ १२॥

ओं हूं हौं हूं फण्णमः।

प्रयोगो विषुवेनायं प्रवाहेण प्रयोजितः।

उद्घाताष्टशतेनाशु गृहं नाशयति ध्रुवम्॥ १३॥

ओं हूं फट् ओं हौं फट् ओं हूं फट् ओं फट् फट् फट् फट्

स्रोतसायमपि क्षिप्रं वारुणेन तु योजितः।

उद्घाताष्टशतेनैव प्रयोगो ज्वरनाशनः ॥ १४ ॥

In Public domain. Digitization Muthulakshmi Research Academy

अष्टानां प्रत्ययानां तु प्रयोगाः कथिता मया।

ज्ञात्वा ज्ञात्वा प्रयुञ्जीत विधिवद्देशिकोत्तमः ॥ १५ ॥

इति श्रीमद्वातुलभेदे द्विशतिकालोत्तरे महातन्त्रे अष्टधाप्रत्ययः षोडशः पटलः ॥

प्रासादज्ञानम् ॥

कार्त्तिकेय उवाच-

प्रासादः कीदृशो ज्ञेयो व्याप्तिस्तस्यैव कीदृशी।

प्रसूतिः कीदृशी तस्य कथयस्व महेश्वर ॥ १ ॥

महेश्वर उवाच-

प्रासादं यो न जानाति पञ्चमन्त्रमहातनुम्।

अष्टत्रिंशत्कलायुक्तं न स आचार्य उच्यते ॥ २ ॥

प्रासादं संयगज्ञात्वा यो दीक्षां कुरुते गुरुः।
In Public domain. Digitization Muthulakshmi Research Academy

अधस्ताच्छिष्यमात्मानं नयते नात्र संशयः॥३॥

प्रासादाब्जशिखान्तस्थो यस्तु दीक्षां करोति हि।

आचार्यः सह शिष्येण शिवसायुज्यतां व्रजेत्॥४॥

देवदानवगन्धर्वरक्षोयक्षोरगेश्वरः।

किन्नराप्सरसः सिद्धाः सर्वे प्रासादसम्भवाः॥५॥

ब्रह्माविष्णुस्तथा रुद्र इन्द्रो वायुः प्रजापतिः।

बृहस्पतिस्तथादित्यः शुक्रः स्कन्दो भृगुस्तथा॥६॥

येऽपि चान्ये ग्रहगणाः सर्वे प्रासादसम्भवाः।

एते चान्ये च बहवो मुनयः संशितव्रताः॥७॥

ध्यायन्ति परमं हंसं प्रासादं नाम नामतः।

विभागं चास्य वक्ष्यामि यं ज्ञात्वाऽमृतमश्नुते॥८॥

सद्यश्चाष्टकलायुक्तमकाराक्षरसम्भवम् ।
In Public domain. Digitization Muthulakshmi Research Academy

विद्यादुकारजं वाममघोरं तु मकारजम्॥ ९॥

बिन्दुजः पुरुषो ज्ञेयो ईशानस्तु शिवात्मजः।

एवं मन्त्रास्तु पञ्चैते स्मृताः प्रासादसम्भवाः॥ १०॥

शतकोटिसहस्राणाम् . . . मितौजसाम्।

प्रासादेनैव चेष्टेन भवन्तीष्टा न संशयः॥ ११॥

मारुतानलशक्राद्या ये मन्त्राः परिकीर्तिताः।

प्रासादाब्जसमुत्पन्नाः सर्वे चामोघशक्तयः॥ १२॥

सद्यस्तु पृथिवी ज्ञेयो वामो ह्यापः प्रकीर्तितः।

अघोरस्तेज इत्युक्तो वायुस्तत्पुरुषः स्मृतः॥ १३॥

आकाशस्तु भवेदीशः स्वयं देवो महेश्वरः।

सद्योजातस्तु ऋग्वेदो वामदेवो यजुः स्मृतः॥ १४॥

अघोरः सामवेदस्तु पुरुषोऽधर्व उच्यते।

पञ्चमं यत् परं सूक्ष्मं व्योमव्यापि सदाशिवः॥ १५॥
In Public domain. Digitization Muthulakshmi Research Academy

सद्योजातस्तु वै ब्रह्मा वामो विष्णुः प्रकीर्तितः।

अघोरो रुद्रदैवत्यः पुरुषश्चेश्वरस्तथा॥ १६॥

ईशानः शिवदैवत्यो ह्यधिदेवाः प्रकीर्तिताः।

षष्ठं तु यत् परं तत्त्वमसादृश्यगुणस्थितम्॥ १७॥

तस्य देहो न वक्तव्यः प्राकृतैर्गुणसम्भवैः।

ज्ञात्वा परमनिश्रेणीं पञ्चसंस्थानगामिनीम्॥ १८॥

ज्ञानं ज्ञातं सकृद्येन विस्मितेनान्तरात्मना।

तत्काल एव मुक्तोऽसौ व्याय ज्ञानं हितं हि तत्॥ १९॥

॥ इति श्रीमद्वातुलभेदे द्विशतिकालोत्तरे महातन्त्रे प्रासादज्ञानलक्षणपटः सप्तदशः॥

In Public domain. Digitization Muthulakshmi Research Academy

In Public domain. Digitization Muthulakshmi Research Academy

In Public domain. Digitization Muthulakshmi Research Academy

In Public domain. Digitization Muthulakshmi Research Academy

In Public domain. Digitization Muthulakshmi Research Academy

In Public domain. Digitization Muthulakshmi Research Academy

In Public domain. Digitization Muthulakshmi Research Academy

In Public domain. Digitization Muthulakshmi Research Academy

In Public domain. Digitization Muthulakshmi Research Academy

In Public domain. Digitization Muthulakshmi Research Academy

In Public domain. Digitization Muthulakshmi Research Academy

In Public domain. Digitization Muthulakshmi Research Academy

In Public domain. Digitization Muthulakshmi Research Academy

உபாகமம்

Saivasastra Prachara Sabha